# अथ राहुकवचम्

**प्रणमामि सदा राहुं शूर्पाकारं किरीटिनम् ।**

**सैंहिकेयं करालास्यं लोकानामभयप्रदम् ।।1।।**

**नीलाम्बरः शिरः पातु ललाटे लोकवन्दितः ।**

**चक्षुषी पातु मे राहुः श्रोत्रे त्वर्धं शरीरवान् । ।2 | |**
**| नासिकां मे धूम्रवर्णः**
**शूलपाणिर्मुखं मम । जिह्वां मे सिंहिकासूनुः**
**कण्ठं मे कठिनाङ्घिकः ।।3 ||**

**भुजङ्गेशो भुजौ पातु नीलमाल्याम्बरः करौ ।**
**पातु वक्षःस्थलं मन्त्री पातु कुक्षिं विधुन्तुदः | |4 ||**

**कटिं मे विकटः पातु ऊरु मे सूरपूजितः ।**
**स्वभानुर्जानुनी पातु जो मे पातु जाड्यहा ।।5 ||**

गुल्फौ ग्रहपतिः पातु पादौ मे भीषणाकृतिः ।
सर्वाण्यङ्गानि मे पातु नीलचन्दनभूषणः । 16 ||

राहोरिदं कवचमृद्धिदवस्तुदं यो भक्त्या पठत्यनुदिनं नियतः
शुचिः सन् । प्राप्नोति कीर्तिमतुलां
श्रियमृद्धिमायुरारोग्यमात्मविजयं च हि तत्प्रसादात् । ।7 ||

।। इति श्रीमहाभारतोक्तं राहुकवचं सम्पूर्णम् ।।

[www.astromanu.com](http://www.astromanu.com)

mob no-7983298169